# Shri Varahi kavacham

# श्रीवाराहीकवचम्

## Document Information

Text title : Varahi Kavacham

File name : vArAhIkavacham.itx

Category : devii, devI, otherforms, kavacha

Location : doc_devii

Latest update : July 7, 2019

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


November 22, 2022

*sanskritdocuments.org*

# श्रीवाराहीकवचम्

अस्य श्रीवाराहीकवचस्य त्रिलोचन ऋषीः । अनुष्टुप्छन्दः ।
श्रीवाराही देवता । ॐ बीजम् । ग्लौं शक्तिः । स्वाहेति कीलकम् ।
मम सर्वशत्रुनाशनार्थे जपे विनियोगः ॥

ध्यानम् -
ध्यात्वेन्द्र नीलवर्णाभां चन्द्रसूर्याग्नि लोचनाम् ।
विधिविष्णुहरेन्द्रादि मातृभैरवसेविताम् ॥ १॥

ज्वलन्मणिगणप्रोक्त मकुटामाविलम्बिताम् ।
अस्त्रशस्त्राणि सर्वाणि तत्तत्कार्योचितानि च ॥ २॥

एतैस्समस्तैर्विविधं बिभ्रतीं मुसलं हलम् ।
पात्वा हिंस्रान् हि कवचं भुक्तिमुक्ति फलप्रदम् ॥ ३॥

पठेत्त्रिसन्ध्यं रक्षार्थं घोरशत्रुनिवृत्तिदम् ।
वार्ताली मे शिरः पातु घोराही फालमुत्तमम् ॥ ४॥

नेत्रे वराहवदना पातु कर्णौ तथाञ्जनी ।
घ्राणं मे रुन्धिनी पातु मुखं मे पातु जन्धिन् ॥ ई ५॥

पातु मे मोहिनी जिह्वां स्तम्भिनी कन्थमादरात् ।
स्कन्धौ मे पञ्चमी पातु भुजौ महिषवाहना ॥ ६॥

सिंहारूढा करौ पातु कुचौ कृष्णमृगाञ्चिता ।
नाभिं च शङ्खिनी पातु पृष्ठदेशे तु चक्रिणि ॥ ७॥

खड्गं पातु च कट्यां मे मेढ्रं पातु च खेदिनी ।
गुदं मे क्रोधिनी पातु जघनं स्तम्भिनी तथा ॥ ८॥

चण्डोच्चण्डश्चोरुयुगं जानुनी शत्रुमर्दिनी ।
जङ्घाद्वयं भद्रकाली महाकाली च गुल्फयो ॥ ९॥

पादाद्यङ्गुलिपर्यन्तं पातु चोन्मत्तभैरवी ।
सर्वाङ्गं मे सदा पातु कालसङ्कर्षणी तथा ॥ १०॥

युक्तायुक्ता स्थितं नित्यं सर्वपापात्प्रमुच्यते ।
सर्वे समर्थ्य संयुक्तं भक्तरक्षणतत्परम् ॥ ११॥

समस्तदेवता सर्वं सव्यं विष्णोः पुरार्धने ।
सर्शशत्रुविनाशाय शूलिना निर्मितं पुरा ॥ १२॥

सर्वभक्तजनाश्रित्य सर्वविद्वेष संहतिः ।
वाराही कवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः ॥ १३॥

तथाविधं भूतगणा न स्पृशन्ति कदाचन ।
आपदश्शत्रुचोरादि ग्रहदोषाश्च सम्भवाः ॥ १४॥

मातापुत्रं यथा वत्सं धेनुः पक्ष्मेव लोचनम् ।
तथाङ्गमेव वाराही रक्षा रक्षाति सर्वदा ॥ १५॥

इति श्रीवाराहीकवचं सम्पूर्णम् ।

*Shri Varahi kavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*